**MASTER OF ARTS EXAMINATION, 2025**

**(1st Year, 1st Semester)**

**SANSKRIT**

**COURSE : IV**

**[ Sanskrit Poetry ]**

*Time* : *Two Hours* *Full Marks* : 30

**PART—I ( Meghadūtam )**

१. अधोनिर्दिष्टाः सर्वे प्रश्नाः संस्कृतभाषया देवनागरीलिपिमाश्रित्य च समाधेयाः —

(क) अलकायाः प्रासादाः कीदृशाः ? 1

(ख) अलकायाः हंसाः किं कुर्वन्ति ? 1

(ग) यक्षगृहस्य समीपे स्थितस्य तोरणस्य परिचयो देयः। 1

(घ) सुरगिरा अर्थाः लेखनीयाः 0·5×4=2

आगारम्, वापी, क्षामच्छायम्, कलभस्य

२. सुरगिरा देवनागरीलिप्या च भावार्थो लेखनीयः — 5

अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां।
रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय।।

**( अथवा )**

न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय।
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः।।

३. पूर्वमेघे वर्णितस्य नदीत्रयस्य वैशिष्ट्यं कवेर्वचनानुसारं लिख्यताम्। 5

**( अथवा )**

'मेघदूतम्' इति काव्यस्य उत्तरमेघे वर्णितं पूर्णसौन्दर्यं नित्यसौन्दर्यं वा कतिपयश्लोकसहायेन विशदीकरणीयम्।

**PART—II ( बुद्धचरितम् )**

४. सिद्धार्थस्य मनसि संवेगोत्पत्तये व्याधिविषयकतत्त्वस्य कारणत्वं बुद्धचरितमिति महाकाव्यस्य तृतीयसर्गमवलम्ब्य व्याख्यायताम्। 6

**( अथवा )**

सिद्धार्थस्य वनगमनवृत्तान्तो यथोपन्यस्तः कविना तथा स्वकीयभाषया समासतो निरूप्यताम्।

५. **संस्कृतभाषया देवनागरीलिप्या** चाधोनिर्दिष्टयोः श्लोकयोः **अन्यतरस्य** सप्रसङ्गं व्याख्या कार्या — 5

(क) ततः स पूर्वाशयशुद्धबुद्धिर्विस्तीर्णकल्पाचितपुण्यकर्मा।
श्रुत्वा जरां संविविजे महात्मा महाशनेर्घोषमिवान्तिके गौः।।





(ख) निवृत्यतां सूत बहिप्रयाणान्नरेन्द्रसद्मैव रथः प्रयातु।
श्रुत्वा च मे रोगभयं रतिभ्यः प्रत्याहतं संकुचतीव चेतः।।

६. अधोलिखितेषु **द्वौ** प्रश्नौ **संस्कृतभाषया देवनागरीलिप्या** च समाधेयौ — $1 \cdot 5 \times 2 = 3$

(क) वातायनेभ्यो विनिसृतानि स्त्रीणां मुखानि कथमुपमीयन्ते कविना ?

(ख) जराविषयकं तत्त्वं संरक्ष्यमपि कथं रथप्रणेता सिद्धार्थये निवेदयामास ?

(ग) कथं वातायनेष्वप्रशमो बभूव ?

७. सुरगिरा पर्यायशब्दो लिख्यताम् — $0 \cdot 5 \times 2 = 1$

(क) संरक्ष्यम्, (ख) पुनर्भावम्।

★★★